International Journal of Sanskrit Research 2025; 11(5): 254-255

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(5): 254-255
© 2025 IJSR
www.anantaajournal.com
Received: 02-09-2025
Accepted: 05-10-2025

**Pareekshith B Vashishta**
Research Scholar,
Department of Music,
KSGH Music and Performing
Arts University, Mysuru,
Karnataka, India

**Corresponding Author:**
**Pareekshith B Vashishta**
Research Scholar,
Department of Music,
KSGH Music and Performing
Arts University, Mysuru,
Karnataka, India

# कर्णाटकसङ्गीताय कन्नडभाषिणां योगदानम्

**Pareekshith B Vashishta**

**DOI:** https://www.doi.org/10.22271/23947519.2025.v11.i5d.2826

**सारांश**
भारतीयकलापरम्परा सुन्दरा गहना च । सङ्गीतकला तु कलासु मधुरा मुख्या वर्तते । यथा नराणां तोषितुं सा शक्ता तथा मोक्षमार्गं दर्शयितुं च । भारतीय सङ्गीतपद्धतिः प्राचीनं अपि च रञ्जनीयम् । भारतीयसङ्गीतशास्त्रलक्ष्यलक्षणं साधयितुं बहवः योगदानं दत्तवन्तः । अन्यदेशाक्रमणादिविविधकारणतया भारतीय सङ्गीतपद्धतिर्द्विधा औत्तरेयदाक्षिणात्यौ अभवताम् । तत्र दाक्षिणात्यपद्धतिः कर्णाटकसङ्गीतनाम्ना प्रसिद्धम् । तत् किमर्थं भवेदिति चिन्तनीयम् । बहवः कन्नडभाषिणः दाक्षिणात्यसङ्गीताय स्वस्य जीवनं दत्तवन्तः । अस्मिन् लेखे तेषां यागदानं प्रतिपादितम् ।

**कूटशब्दः** कर्णाटकसङ्गीतः, विद्यारण्यः, कन्नडभाषिन्, वेङ्कटमखिन्, पुरन्दरदासः

## प्रस्तावना

भारतीयज्ञानपरम्परा दीर्घा वैषिट्यपूर्णा वर्तते । भावनाभियक्तिमाध्यमाः कलाः । भारतीयकलाः भारतस्य शिरोरत्ना इव शोभन्ते । तासु माधुर्यसौकुमार्यादिगुणसम्पन्नसङ्गीतकला विशेषतया प्रकाशयति । लौकिकालौकिकसम्पदावाप्त्यर्थं सङ्गीतोपासनं करणीयम् । प्राचीनमानवाश्च गीतमार्गे भावानाभिव्यक्तिं कृतवन्तः । अद्यापि अरण्यवासिनः वृक्षमूलवाद्यान् वादयति । नादात्मकं जगत् इति अनेकशास्त्रग्रन्थाः प्रतिपादयन्ति । भारतीयपरम्परायां नादोपासना श्रेष्ठतरमेव । प्रणवनादात् जगत्सृष्टिरभूदिति श्रद्धापि वर्तते। भारतीयसङ्गीतपद्धतिः वेदमूलियमेव । सामवेदस्य उपवेदं गान्धर्वमिति प्रसिद्धम् । गानयोग्यऋचाः योनिमन्त्राः सामार्हाः । सामवेदकालानन्तरम् इतिहासपुराणादिषु च सङ्गीतस्य उल्लेखो भवति ।
भारतीयसङ्गीतशास्त्रग्रन्थेषु आदिमग्रन्थः भरतमुनिविरचितनाट्यशास्त्रम् । तत्रैव मूर्छनेत्यादि गीतसम्बद्धशब्दानि सन्ति । दत्तिलम्, कोहलमतम् इत्यादि बहवः ग्रन्थाः तदनन्तरमभवत् । त्रयोदशशतमानपर्यन्तं भारते एकमेव सङ्गीतपद्धतिरासीत् । विदेशी आक्रमणादि अनेककारणात् संस्कृतिः सङ्गीतश्च भिन्नमभवताम् । शास्त्रग्रन्थेषु प्रायः सङ्गीतरत्नाकरपर्यन्तं सङ्गीतपद्धतिरेको एव । त्रयोदशशतमाने भारतस्य अत्तरदिग्भागे आमिर् खुस्रो तथा च कन्नडदेशीय गोपालनायकः सङ्गीताभिवृद्धिं कृतवन्तौ । तदेव हिन्दूस्थानि सङ्गीतमभवत् । दक्षिणदिग्भागे विद्यारण्यादि महनीयाः पुरातनशास्त्रसम्बद्धसङ्गीताय नवरूपं दत्त्वा शास्त्रीयरीत्या सङ्गीताभिवृद्धिं कृतवन्तः । तदेव कर्णाटकसङ्गीतमभवत् ।

## कन्नडभाषिणां योगदानम्

भारतीयसङ्गीतपरम्परायाम् बहवः कोविदाः प्रसिद्धाः । तेषु अग्रिमसोपाने विद्यारण्यमहर्षिरपि स्थितः । भारतीयमार्गसङ्गीते विद्यमानपुरातनग्रामपद्धतिं परिष्कृत्य मेलपद्धतिम् आनेतुं विद्यारण्यसय योगदानमनुपमम् । सः कर्णाटकसिंहासनप्रतिष्ठापनाचार्यः कर्णाटकसङ्गीतमेलपद्धतिप्रतिष्ठापनाचार्यश्च । सः "सङ्गीतसार"ग्रन्थम् रचितवान् । अधुना तदलभ्यम् । परन्तु विद्यारण्यवंशीयस्य तञ्जावूरुमहामात्यगोविन्ददीक्षितस्य "सङ्गीतसुधा" ग्रन्थे सङ्गीतसारश्लोकाः सन्ति । ग्रामपद्धतौ षड्ज–मध्यमग्रामौ आस्ताम् । तत्र भिन्नभिन्न विकृतस्वरव्यूहौ च आस्ताम्। तत्सर्वं विद्यारण्यमहर्षिः एकत्र आनीतवान् । ये ये रागाः आसम् तान् भिन्न भिन्न गणे संयोजितवान् । गणेस्थितरागेषु क्वचित् अपि भावसादृश्यं स्वरसादृश्यं भवेदिति तत्त्वं संस्थाप्य रागवर्गीकरणं कृतवान् । गण एव "मेल" इति नाम्ना प्रसिद्धम् । प्रतिमेले एकः नायकरागः भवेत् । तद्रागसमूहमेले ये ये प्रकृति–विकृति स्वराः सन्ति तत्सर्वाणि नायकरागे अवश्यं भवेदिति चिन्त्य नायकरागं मेलकर्तरागमिति नामकरणं कृतवान् । अद्यापि विद्यारण्यसय मेलपद्धतिम् अनुसृत्य एव कर्णाटकसङ्गीतः स्थितः । मेलपद्धतिना वीणावादनमपि सुलभमभवत्। कर्णाटकसङ्गीतस्य विकसनं कर्णाटकसाम्राज्ये विद्यानगर्याम् अभवत् ।

विद्यारण्यानन्तरं कर्णाटके स्थितः सङ्गीतज्ञः कल्लिनाथः । सः शार्ङ्गदेवविरचितसङ्गीतरन्ताकराय प्रौढरीत्या "सङ्गीतकलानिधि" नाम्ना व्याख्यां रचितवान् । सः रागविवेकाध्याय व्याख्यायां पर्यायतत्तवस्य प्रतिनिधितत्त्वस्य च प्रमेयौ स्वरसप्तकमीमांसायां मण्डितवान् । एके स्वरस्थाने पूर्वोत्तरेस्थितौ स्वरौ सन्दर्भानुसारेण उपयुक्तं भवतः चेत् तत् पर्यायतत्त्वम् । श्रुतिस्थानस्य अल्पपल्लटनकारणात् यौ पूर्वोत्तरस्वरौ उत्पत्तिं प्राप्नुवः तौ उभावपि मूलस्वरनाम्ना एव निर्देशितवन्तौ इति प्रतिपादनं यः तत्त्वः करोति तदेव प्रतिनिधितत्त्वः । कल्लिनाथानन्तरं रामामात्यः पण्डरीकविठलश्च प्रसिद्धौ सङ्गीतकोविदौ । पण्डरीकविठलः कर्णाटकसङ्गीतहिन्दूस्थानिसङ्गीतनृत्यविद्वान् आसीत् । सः "सद्रागचन्द्रोदय" इति कर्णाटकसङ्गीतशास्त्रग्रन्थं अपि च "रागमञ्जरी" इति हिन्दूस्थानिसङ्गीतशास्त्रग्रन्थं "नर्तननिर्णयः" इति नृत्यशास्त्रग्रन्थम् रचितवान् । सद्रागचन्द्रोदये स्वर–स्वरमेल–आलप्तिरिति त्रिप्रसादाः सन्ति। पूर्वाचार्यान् अनुसृत्य नादोत्पत्तिः–श्रुतयः–शुद्ध–विकृ तिस्वराः–वादिसंवाद्यनुवादिविवादिस्वराः–ग्राम–मूर्छना–तान इत्यादि अनेक विचारान् प्रतिपादितवान् । "रागविबोध"कर्ता सोमनाथः "स्वरमेलकलानिधि"कर्ता रामामात्यः पण्डरीकविठलश्च अन्तर–काकलीस्वरस्थानौ प्रतिपादितवन्तः । च्युतषड्ज–च्युतमध्यमौ काकलीनिषाद–अन्तरगान्धारौ अभवताम् । पूर्वे विद्यमान पञ्चमस्वरविकृतिं मध्यमविकृतिरिति परिष्कारं कृतवन्तः । अत एव प्रतिमध्यमः अभवत् ।

अभिनव भरताचार्यः रामामात्यः अपि प्रसिद्धः उभयकारः । सः वाचं गेयं च करोति स्म । सः "स्वरमेलकलानिधि"ग्रन्थे विंशति मेलप्रस्तापम् अकरोत् । स्वर–वीणा–मेल–रागप्रकरणाः तस्य ग्रन्थे निबद्धाः । मार्ग–गान्धर्वयोः विवरणात्मकश्लोकाः सन्ति । रागाणां उत्तम–मध्यम–अधम इति वर्गीकरणमपि रामामात्यः कृतवान् ।

विजयनगरस्य पतनानन्तरं तञ्जावूरु राज्ये कर्णाटकसङ्गीतस्य विकसनमभवत् । तत्रापि कन्नडभाषिणः योगदानं दत्तवन्तः । अमात्य गोविन्ददीक्षितस्य "सङ्गीतसुधा" प्रमुखकर्णाटकसङ्गीतशास्त्रग्रन्थः । गोविन्द दीक्षितस्य पुत्रः वेङ्कटमखिन् । सः कर्णाटकसङ्गीतपाणिनी इति ख्यातः । सः "चतुर्दण्डी प्रकाशिका" इति ग्रन्थं रचितवान् । गीत–आलाप–ठाय–प्रबन्धाः चतुर्दण्डी । लक्ष्य–लक्षणदृष्ट्या ग्रन्थमेतत् अनुपमम् । वेङ्कटमखी द्विसप्ततिमेलरागान् प्रतिपाद्य अधुना विद्यमान कर्णाटकसङ्गीतमूलमातृकान् स्थापितवान् । दशाध्यायी ग्रन्थः चतुर्दण्डी प्रकाशिका । अनुष्टुप् छन्दोबद्धद्वादशशताधिक श्लोकाः सन्ति । वीणा–श्रुति–स्वर–मेल–राग–आलाप–ठाय–गीत–प्रबन्ध–तालप्रकरणः सन्ति । अद्य विद्यामन अलङ्कारेत्यादि गीतरचनाप्रकाराः अपि उल्लेखं प्राप्नुवन्ति । कल्पित–कल्प्यमान–कल्पयिष्यमानरागारू इति वर्गीकरणं कृतवान् । षट्त्रिंशत् शुद्धमध्यममेलाः षट्त्रिंशत् प्रतिमध्यममेलाः अभवन् । ग्रह–अशं–मन्द्र–तार–अपन्यासेत्यादि दशरागलक्षणान् प्रतिपादितवान् । मुत्तुस्वामिदीक्षितः वेङ्कटमखिनः मेलपद्धतिम् अनुसृत्य कृतिरचनामकुर्वन् ।

ये सर्वे शास्त्रकाराः । कर्णाटक सङ्गीत पितामहः पुरन्दरदासः दासवरेण्यः । व्यासराजादि हरिदासाश्च कर्णाटकसङ्गीताय अनुपमं योगदानं दत्तवन्तः । यथा विद्यारण्यादयः परिशुद्धलक्ष्यविचारान् दत्तवन्तः तथा पुरन्दरादयः श्रेष्ठतरलक्षणकृतीन् दत्तवन्तः । पुरन्दरदासः बालपाठक्रमं कृतवान् । मायामालवगौलरागमेव सूक्तं इति विचार्य तस्मिन् रागे अभ्यासगानं योजितवान् । अष्टोत्तरशततालान् सरलीकृत्य सूळादि सप्ततालेषु अनेककृतीन् रचितवान् । पुरन्दरादि बहवः हरिदासाः श्रेष्ठतररचनां दत्तवन्तः । प्रायः रामामात्यस्य ग्रन्थे लक्षणभागः पुरन्दरादि हरिदाससङ्गीतप्रेरितः परन्तु खचिततया वक्तुं न शक्यते । गीत–ठाय–सुळादि–पद–दण्डाक इत्यादि बहुविधकृतिप्राकारान् रचितवन्तः हरिदासाः । धातु–मातुसमायुक्तकृतिरचनाकार्ये हरिदासाणां कौशलम् अद्वितीयम् । हरिदासाणां योगदानं अत्र अतिसंक्षिप्तरीत्या प्रतिपादितम् । तदेकं प्रत्येकं बृहद्ग्रन्थं भवितुमर्हति ।

**समारोपः**

"कर्णाम् अटति" इति कर्णाटः अत एव कर्णाटक सङ्गीतमिति केचित् जना आहुः । "कर्णाटकसङ्गीत" इति नामकरणं न कन्नडभाषिणः परन्तु तमिळुभाषिणः कृतम् । कर्णाटकसङ्गीताभिवृद्धयर्थं कन्नडभाषिणां योगदानं स्पष्टम् । अत एव सङ्गीतस्यास्य नाम एव कर्णाटक सङ्गीतः भवेदिति नातिशयोक्तिः ।

**परामर्शग्रन्थाः**


1. Ramamatya's Svaramela Kalanidhi (A work on Music), Ed. M. S. Ramaswami Aiyar, The Annamalai University, 1932
2. ಕರ್ನಾಟಕದ ಕಲೆಗಳು, ಎರಡನೆಯ ಸಂಪುಟ, ಸಂಗೀತ [ಭಾಗ–1], ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಡಾ. ರಾ. ಸತ್ಯನಾರಾಯಣ, ಕನ್ನಡ ಸಾಹಿತ್ಯ ಪರಿಷತ್ತು, ಬೆಂಗಳೂರು, 1983.
3. ಸಂಗೀತ: ಇತಿಹಾಸ–ಪರಂಪರೆ, ವಿದ್ಯಾಲಂಕಾರ ಪ್ರೊ॥ ಎಸ್. ಕೆ ರಾಮಚಂದ್ರ ರಾವ್, ಪ್ರಸಾರಾಂಗ, ಬೆಂಗಳೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ, ಬೆಂಗಳೂರು, 1993.
4. ಕರ್ಣಾಟಕಸಂಗೀತವಾಹಿನಿ, ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ಡಾ. ರಾ. ಸತ್ಯನಾರಾಯಣ, ಕನ್ನಡ ಪುಸ್ತಕ ಪ್ರಾಧಿಕಾರ, ಬೆಂಗಳೂರು, 2001.
5. श्रीवेङ्कटमखिविरचिता चतुर्दण्दीप्रकाशिका, इन्दिरा गान्धि राष्ट्रीय कला केन्द्र, देहली, २००२
6. Collected Writings on Indian Music, Vol-I-III, Dr V Raghavan, Dr V Raghavan Centre for Performing Arts, Chennai, 2020.